[1]फालः, [2]दासीफली इति रूपाण्यस्य भवन्तीति विशेषः ।

(1090) "ञि फला विशरणे" (I-भ्वादिः-516. अक. सेट्. पर.)

'विशरणम् = विकसनम् ।' इति धा. का. व्याख्यायाम् (1-66) ।

'फलेर्विशरणे फुल्लम्, फलितम्, फलति त्रयम् ॥

आदितो, ऽनादितस्त्वन्त्ये रूपे निष्पत्तिवाचिनः ।' (श्लो. 158-159) इति देवः ।

फालकः-लिका, फालकः-लिका, पिफलिषकः-षिका, [3]पम्फुलकः-पंफुलकः-लिका;
फलिता-त्री, फालयिता-त्री, पिफलिषिता-त्री, पम्फुलिता-त्री ;
फलन्-न्ती, फालयन्-न्ती, पिफलिषन्-न्ती ; —
फलिष्यन्-न्ती-ती, फालयिष्यन्-न्ती-ती, पिफलिषिष्यन्-न्ती-ती ; —
— फालयमानः, फालयिष्यमाणः, — पम्फुल्यमानः, पम्फुलिष्यमाणः ;
[4]फल्-फलौ-फलः ; — — —
[5]फुल्लः-[6]फुल्लवान्, [7]प्रफुल्तम्-प्रफुल्तः-प्रफुल्तवान्, [8]फलितम्-फलितवान्, [9]उत्फुल्लः-

---

1. 'हलश्च' (3-3-121) इति संज्ञायां घञ् । फल्यते = निष्पाद्यतेऽनेन धान्यादिकमिति फालः = हलः ।
2. 'पाककर्णपर्णपुष्पफलमूल—' (4-1-64) इति जातिवाचिनः फलोत्तरपदादसमात् स्त्रियां ङीष् ।
3. यङन्ताण्ण्वुलि द्वित्वादिके कृते, 'उत् परस्यातः' (7-4-88) इति उत्तरखण्डस्थाकारस्योकारे, परसवर्णविकल्पे च रूपद्वयम् । एवं यङन्ते सर्वत्र ज्ञेयम् ।
4. 'न पदान्ताः परेऽणः सन्ति ।' इति वचनं तु भाष्यासम्मतमिति, लकारान्तस्यास्य प्रयोग उपपन्नः ।
5. निष्ठायाम्, 'आदितश्च' (7-2-16) इति इण्निषेधे, 'अनुपसर्गात् फुल्लक्षीब—' (8-2-55) इत्यत्र निपातनात् निष्ठातकारस्य लकारः, प्रकृतिघटिताकारस्योत्वं च । यद्वा, लत्वस्यासिद्धत्वेन तकारादिप्रत्ययपरकत्वात्, 'ति च' (7-4-89) इत्युत्वमिति ज्ञेयम् ।
6. 'क्तवतोरप्येतल्लत्वमिष्यते ।' इति वृत्तिः । तन्मते फुल्लवान् इत्यपि साधुः ।
7. अनुपसर्गादेव लत्वस्य निपातनात्, सोपसृष्टात् इण्निषेधे, उत्वे च रूपमेवम् । प्रफुल्लम् इति तु 'फुल्ल विकसने' इत्यस्मात् पचाद्यचि ज्ञेयम् ।
8. 'विभाषा भावादिकर्मणोः' (7-2-17) इति भावे, आदिकर्मणि च या निष्ठा, तत्र विषये इण्निषेधस्य विकल्पनात् फलितम् इत्यपि साधुरिति ज्ञेयम् ।
9. 'उत्फुल्लसम्फुल्लयोरुपसंख्यानम्' (वा. 8-2-55) इति वचनादत्रापि निष्ठातकारस्य लत्वमिति ज्ञेयम् । क्तवत्वन्तस्यापीदं लत्वमिति वृत्तिकारेष्टेः तत्रापि लत्वम् ।